श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ पञ्चसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चसप्ततितमः सर्गः ॥

## श्रीरामलक्ष्मणयोर्वार्तालापस्तयोः पम्पातटे गमनम्

दिवं तु तस्यां यातायां शबर्यां स्वेन तेजसा।
लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः॥ **3.75.1** ॥

चिन्तयित्वा तु धर्मात्मा प्रभावं तं महात्मनाम्।
हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत्॥ **3.75.2** ॥

दृष्टो मयाऽऽश्रमः सौम्य बह्वाश्चर्यः कृतात्मनाम्।
विश्वस्तमृगशार्दूलो नानाविहगसेवितः॥ **3.75.3** ॥

सप्तानां च समुद्राणां तेषां तीर्थेषु लक्ष्मण।
उपस्पृष्टं च विधिवत् पितरश्चापि तर्पिताः॥ **3.75.4** ॥

प्रणष्टमशुभं यन्नः कल्याणं समुपस्थितम्।
तेन त्वेतत् प्रहृष्टं मे मनो लक्ष्मण सम्प्रति॥ **3.75.5** ॥

हृदये मे नरव्याघ्र शुभमाविर्भविष्यति।
तदागच्छ गमिष्यावः पम्पां तां प्रियदर्शनाम्॥ **3.75.6** ॥

ऋष्यमूको गिरिर्यत्र नातिदूरे प्रकाशते।
यस्मिन् वसति धर्मात्मा सुग्रीवोऽंशुमतः सुतः॥ **3.75.7** ॥

नित्यं वालिभयात् त्रस्तश्चतुर्भिः सह वानरैः।
अहं त्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम्॥ **3.75.8** ॥

तदधीनं हि मे कार्यं सीतायाः परिमार्गणम्।
इति ब्रुवाणं तं वीरं सौमित्रिरिदमब्रवीत्॥ **3.75.9** ॥

गच्छावस्त्वरितं तत्र ममापि त्वरते मनः।
आश्रमात्तु ततस्तस्मान्निष्क्रम्य स विशाम्पतिः॥ **3.75.10** ॥

आजगाम ततः पम्पां लक्ष्मणेन सह प्रभुः।
समीक्षमाणः पुष्पाढ्यं सर्वतो विपुलद्रुमम्॥ **3.75.11** ॥

कोयष्टिभिश्चार्जुनकैः शतपत्रैश्च कीरकैः।
एतैश्चान्यैश्च बहुभिर्नादितं तद् वनं महत्॥ **3.75.12** ॥

स रामो विविधान् वृक्षान् सरांसि विविधानि च।
पश्यन् कामाभिसन्तप्तो जगाम परमं ह्रदम्॥ **3.75.13** ॥

स तामासाद्य वै रामो दूरात् पानीयवाहिनीम्।
मतङ्गसरसं नाम ह्रदं समवगाहत॥ **3.75.14** ॥

तत्र जग्मतुरव्यग्रौ राघवौ हि समाहितौ।
स तु शोकसमाविष्टो रामो दशरथात्मजः॥ **3.75.15** ॥

विवेश नलिनीं रम्यां पङ्कजैश्च समावृताम्।
तिलकाशोकपुन्नागबकुलोद्दालकाशिनीम्॥ **3.75.16** ॥

रम्योपवनसम्बाधां पद्मसम्पीडितोदकाम्।
स्फटिकोपमतोयां तां श्लक्ष्णवालुकसन्तताम्॥ **3.75.17** ॥

मत्स्यकच्छपसम्बाधां तीरस्थद्रुमशोभिताम्।
सखीभिरिव संयुक्तां लताभिरनुवेष्टिताम्॥ **3.75.18** ॥

किन्नरोरगगन्धर्वयक्षराक्षससेविताम्।
नानाद्रुमलताकीर्णां शीतवारिनिधिं शुभाम्॥ **3.75.19** ॥

पद्मसौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः।
नीलां कुवलयोद्घाटैर्बहुवर्णां कुथामिव॥ **3.75.20** ॥

अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम्।
पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम्॥ **3.75.21** ॥

स तां दृष्ट्वा ततः पम्पां रामः सौमित्रिणा सह।
विललाप च तेजस्वी रामो दशरथात्मजः॥ **3.75.22** ॥

तिलकैर्बीजपूरैश्च वटैः शुक्लद्रुमैस्तथा।
पुष्पितैः करवीरैश्च पुन्नागैश्च सुपुष्पितैः॥ **3.75.23** ॥

मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः॥ **3.75.24** ॥

अन्यैश्च विविधैर्वृक्षैः प्रमदामिव शोभिताम्।
अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः॥ **3.75.25** ॥

ऋष्यमूक इति ख्यातश्चित्रपुष्पितपादपः।
हरिर्ऋक्षरजोनाम्नः पुत्रस्तस्य महात्मनः॥ **3.75.26** ॥

अध्यास्ते तु महावीर्यः सुग्रीव इति विश्रुतः।
सुग्रीवमभिगच्छ त्वं वानरेन्द्रं नरर्षभ॥ **3.75.27** ॥

इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमः।
कथं मया विना सीतां शक्यं लक्ष्मण जीवितुम्॥ **3.75.28** ॥

इत्येवमुक्त्वा मदनाभिपीडितः
स लक्ष्मणं वाक्यमनन्यचेतसम्।

विवेश पम्पां नलिनीं मनोहरां
रघूत्तमः शोकविषादयन्त्रितः ॥ **3.75.29** ॥

ततो महद्वर्त्म सुदूरसङ्क्रमः
क्रमेण गत्वा प्रविलोकयन् वनम्।
ददर्श पम्पां शुभदर्शकाननाम्
अनेकनानाविधपक्षिसङ्कुलाम् ॥ **3.75.30** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥